शास्त्री-I

Date 06.08.20
Page 1

लग्न की दशा के शुभाशुभत्व —

होरादशा दृकाणैः पूजितमध्याधमा चरे क्रमशः।
द्विशरीरे विपरीता स्थिरे तु पापेष्टमध्यफला॥

होरा लग्नं तस्य दशा द्रेक्काणैः शुभाशुभा ज्ञेया। तत्र चरराशौ लग्नगते प्रथमद्रेक्काणे जातस्य पूजिता दशा भवेत्। द्वितीये मध्यफला, तृतीये अधमा नेष्टा। अनुक्रमेण द्विशरीरे विपरीता तेन द्विःस्वभावराशौ लग्नगते प्रथम द्रेक्काणे अधमा, द्वितीयद्रेक्काणे मध्यफला, तृतीयद्रेक्काणे पूजिता शुभा। स्थिरे स्थिरराशौ लग्नगते प्रथमद्रेक्काणे पापा, द्वितीये इष्टफला, तृतीये द्रेक्काणे मध्यफला बोध्या

भावार्थः— यदि चर लग्न हो तो प्रथम द्रेक्काण में लग्नदशाफल शुभ, द्वितीय द्रेक्काण में दशाफल मध्यम, तृतीय द्रेक्काण में दशाफल अशुभ समझना चाहिये। एवं द्विःस्वभाव लग्न हो तो लग्नदशाफल विपरीत समझें। अर्थात् प्रथम द्रेक्काण में अशुभ, द्वितीय द्रेक्काण में मध्यम तथा तृतीय द्रेक्काण में शुभ फल होता है। यदि स्थिर लग्न हो तो प्रथम द्रेक्काण में अशुभ फल, द्वितीय द्रेक्काण में शुभ फल और तृतीय द्रेक्काण में मध्यम फल समझना चाहिये।

विशेष — मेष, कर्क, तुला, मकर — चर लग्न।
वृष, सिंह, वृश्चिक, कुंभ — स्थिर लग्न।
मिथुन, कन्या, धनु, मीन — द्विःस्वभावलग्न।

डॉ० सुधिवट कुमार
सहा० प्राचार्य (ज्योतिष)
रा० उ० सं० महावि० सुखसेना पूर्णियाँ

अन्तर्दशामाह —

एकर्क्षेऽर्धं त्र्यंशं त्रिकोणयोः सप्तमे तु सप्तांशम्।
चतुरस्रयोस्तु पादं पाचयति गतो ग्रहः स्वगुणैः॥

येन ग्रहेण यो ग्रहः एकर्क्षे स्थितः स तद्दत्तदशाया अर्धमपहृत्य स्वैर्दशागुणैः पाचयति। दशापते स्त्रिकोणयोः स्थितो ग्रहः दशापतिदशाकालात्त्र्यंशं स्वैर्गुणैः पाचयति। दशापतेश्चतुर्थस्थानस्थोऽष्टमस्थानस्थो वा ग्रहपादं चतुर्थांशं दशापतिदत्तकालादपहृत्य स्वगुणैः पाचयति। न केवलं ग्रहाल्लग्नादपि एतेषु स्थानेषु समवस्थितो ग्रहः यथोक्तमंशं पाचयति यद्येकस्था बहवो भवन्ति तदा तेषु मध्ये यो बलवान् स एव पाचयति नान्यः।

भावार्थः- दशाधिप के साथ रहने वाला ग्रह (एकर्क्ष) अपने स्वभावानुसार दशाधिप के अन्तर्दशा से आधा ($\frac{1}{2}$) अन्तर्दशा का पाचक (दायक) तथा त्रिकोण में रहने वाला ग्रह तृतीयांश ($\frac{1}{3}$) अन्तर्दशा का पाचक होता है। चतुर्थ और अष्टम (4।8) में रहने वाला ग्रह चतुर्थांश ($\frac{1}{4}$) का पाचक तथा सप्तम स्थान में रहने वाला ग्रह सप्तमांश ($\frac{1}{7}$) का पाचक होता है। यदि निम्नलिखित स्थानों में अनेक ग्रह हों तो एक ग्रह (बली ग्रह) अन्तर्दशा का पाचक होगा। उक्त स्थान से भिन्न स्थान में स्थित ग्रह अन्तर्दशाधिप नहीं होते हैं। इसी प्रकार लग्न से भी समझना चाहिये।

डॉ० सुधीर कुमार
सहा० प्राचार्य (ज्योतिष)
रा०उ० सं० महावि० सुखसेना,
पूर्णियाँ।

(14) द्वारोच्छ्रायद्विगुणितां त्यक्त्वा भूमिं बहिः स्थितः।
~~[illegible]~~ न दोषाय भवेदेको गृहस्य बाहिरोऽपि च
इति कस्य वचनम्?

उत्तरम्- गर्गस्य।

(15) कूपेन विद्धं द्वारं किं करोति?

उत्तरम्- अपस्मारं स्थापयति।

(16) प्रच्छाकाले गृहस्वामी यदङ्गं स्पृशति स्वकम्।
भुवो हस्तप्रमाणेन शल्यं ब्रूयात्तदङ्गजम्॥
कुत्र लिखितमस्ति पद्यमिदम्?

उत्तरम्- आगमान्तरे।

(17) प्रश्नकाले गृहपतिः कस्मिन्नङ्गे समास्थितः।
किमङ्गं संस्पृशेद्वापि व्याहरेद्वा शुभाशुभम्॥
कस्य वाक्यमिदम्?

उत्तरम्- गर्गस्य।

(18) प्रथमं कुत्र पूजां विधाय शिलान्यासं कुर्यात्?

उत्तरम्- ईशानकोणे।

(19) स्निग्धाद्रिभूभागसमुत्थितानां न्यग्रोधबिल्वद्रुमखादिराणाम्।
शमीवटोदुम्बरदेवदारुक्षीरिस्वदेशोत्थफलद्रुमाणाम्॥
उपोषितं शिल्पिजनस्त्वधैषां मध्यात्तु तीक्ष्णेन कुठारकेण।
नीत्वा ततो विप्रपतिनोत्तरस्यां शुभे च लग्ने परिगृह्य शङ्कुम्॥
इति कस्य वाक्यम?

उत्तरम्- गर्गस्य।

(20) प्रागुत्तरे समुन्नतायां वास्तुभूमौ किं भवति?

उत्तरम्- धनसुतक्षयः।

डॉ० सुशिष्ट कुमार
सहा० प्राचार्य (ज्योतिष)
रा०उ० सं० महावि० सुखसेन
पूर्णियाँ।

वस्तुनिष्ठप्रश्ना:

शास्त्री-I, II

Date 06.08.20
Page 3

(1) पूर्वकथितानां केषां वंशसंज्ञा ?
उत्तरम् - परसूत्राणाम्।
(2) दक्षिणभुजाविकलः वास्तु किं करोति ?
उत्तरम् - धननाशं करोति।
(3) पुत्रमरणं कीदृग्वास्तुः करोति ?
उत्तरम् - चरणहीनम्।
(4) सर्वाङ्गपूर्णवास्तु किं ददाति गृहस्वामिनम् ?
उत्तरम् - धनधान्यं सुखं ददाति।
(5) ब्राह्मणः निवासस्थानं कस्यां दिशि रचयेत् ?
उत्तरम् - उत्तरस्यां दिशि।
(6) पूर्वस्यां दिशि कः निवासस्थानं रचयेत् ?
उत्तरम् - वैश्यः।
(7) शिख्यादयात्समारभ्य अष्टौ देवता कस्यां दिशि ?
उत्तरम् - पूर्वस्याम्।
(8) पूर्वस्यां दिशि कियन्तः सन्ति देवताः ?
उत्तरम् - अष्टौ।
(9) अष्टासु देवासु कस्योपरि कृते द्वारे शुभं भवति ?
उत्तरम् - इन्द्रस्योपरि।
(10) अल्पसुतत्वं कस्यां दिशि गतस्य द्वारफलम् ?
उत्तरम् - दक्षिणस्यां दिशि।
(11) रिपुवृद्धिः कस्यां दिशि गतस्य द्वारस्य फलम् ?
उत्तरम् - पश्चिमस्यां दिशि।
(12) स्तम्भतरुभ्रमकोणैर्विद्धं वेश्म न मङ्गलकरं द्वारम्।
वेधोच्छायाद् द्विगुणां भूमिं त्यक्त्वा न दोषाय॥
इति कस्य वाक्यम् ?
उत्तरम् - समाससंहिताकारस्य।
(13) केन वेधेन गृहस्वामिनो मृत्युर्भवति ?
उत्तरम् - मार्गेण।

P.T.O